# Shri Gayatri Kavacham 1

# શ્રીગાયત્રીકવચમ્ ૧

## Document Information

Text title : gAyatrI kavacham 1

File name : gaayatriikavach.itx

Category : kavacha, devii, gAyatrI, devI

Location : doc_devii

Author : Traditional, yAjnavalkyaproktam

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, PSA Easwaran

Description-comments : vasiShTha saMhitA

Latest update : August 17, 2004, April 7, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# Shri Gayatri Kavacham 1

# શ્રીગાયત્રીકવચમ્ ૧

શ્રીગણેશાય નમઃ ।
યાજ્ઞવલ્ક્ય ઉવાચ ।
સ્વામિન્ સર્વજગન્નાથ સંશયોઽસ્તિ મહાન્મમ ।
ચતુઃષષ્ઠિકલાનં ચ પાતકાનાં ચ તદ્વદ ॥ ૧॥

મુચ્યતે કેન પુણ્યેન બ્રહ્મરૂપં કથં ભવેત્ ।
દેહં ચ દેવતારૂપં મન્ત્રરૂપં વિશેષતઃ ॥ ૨॥

ક્રમતઃ શ્રોતુમિચ્છામિ કવચં વિધિપૂર્વકમ્ ।
બ્રહ્મોવાચ ।
ગાયત્ર્યાઃ કવચસ્યાસ્ય બ્રહ્મા વિષ્ણુઃ શિવો ઋષિઃ ॥ ૩॥

ઋગ્યજુઃસામાથર્વાણિ છન્દાંસિ પરિકીર્તિતાઃ ।
પરબ્રહ્મસ્વરૂપા સા ગાયત્રી દેવતા સ્મૃતા ॥ ૪॥

રક્ષાહીનં તુ યત્સ્થાનં કવચેન વિના કૃતમ્ ।
સર્વં સર્વત્ર સંરક્ષેત્સર્વાઙ્ગં ભુવનેશ્વરી ॥ ૫॥

બીજં ભર્ગશ્ચ યુક્તિશ્ચ ધિયઃ કીલકમેવ ચ ।
પુરુષાર્થવિનિયોગો યો નશ્ચ પરિકીર્ત્તિતઃ ॥ ૬॥

ઋષિં મૂર્ધ્નિ ન્યસેત્પૂર્વં મુખે છન્દ ઉદીરિતમ્ ।
દેવતાં હૃદિ વિન્યસ્ય ગુહ્યે બીજં નિયોજયેત્ ॥ ૭॥

શક્તિં વિન્યસ્ય પદયોર્નાભૌ તુ કીલકં ન્યસેત્ ।
દ્વાત્રિંશત્તુ મહાવિદ્યાઃ સાઙ્ખ્યાયનસગોત્રજાઃ ॥ ૮॥

દ્વાદશલક્ષસંયુક્તા વિનિયોગાઃ પૃથક્પૃથક્ ।
એવં ન્યાસવિધિં કૃત્વા કરાઙ્ગં વિધિપૂર્વકમ્ ॥ ૯॥

વ્યાહૃતિત્રયમુચ્ચાર્ય હ્યનુલોમવિલોમતઃ ।

ચતુરક્ષરસંયુક્તં કરાઙ્ગન્યાસમાચરેત્ ॥ ૧૦॥

આવાહનાદિભેદં ચ દશ મુદ્રાઃ પ્રદર્શયેત્ ।
સા પાતુ વરદા દેવી અઙ્ગપ્રત્યઙ્ગસઙ્ગમે ॥ ૧૧॥

ધ્યાનં મુદ્રાં નમસ્કારં ગુરુમન્ત્રં તથૈવ ચ ।
સંયોગમાત્મસિદ્ધિં ચ ષડ્વિધં કિં વિચારયેત્ ॥ ૧૨॥

અસ્ય શ્રીગાયત્રીકવચસ્ય બ્રહ્મવિષ્ણુરુદ્રા ઋષયઃ,
ઋગ્યજુઃસામાથર્વાણિ છન્દાંસિ, પરબ્રહ્મસ્વરૂપિણી
ગાયત્રી દેવતા, ભૂર્બીજં, ભુવઃ શક્તિઃ, સ્વાહા કીલકં,
શ્રીગાયત્રીપ્રીત્યર્થે જપે વિનિયોગઃ ॥

ૐ ભૂર્ભુવઃ સ્વઃ તત્સવિતુરિતિ હૃદયાય નમઃ ।
ૐ ભૂર્ભુવઃ સ્વઃ વરેણ્યમિતિ શિરસે સ્વાહા ।
ૐ ભૂર્ભુવઃ સ્વઃ ભર્ગો દેવસ્યેતિ શિખાયૈ વષટ્ ।
ૐ ભૂર્ભુવઃ સ્વઃ ધીમહીતિ કવચાય હુમ્ ।
ૐ ભૂર્ભુવઃ સ્વઃ ધિયો યો નઃ ઇતિ નેત્રત્રયાય વૌષટ્ ।
ૐ ભૂર્ભુવઃ સ્વઃ પ્રચોદયાદિતિ અસ્ત્રાય ફટ્ ॥

વર્ણાસ્ત્રાં કુણ્ડિકાહસ્તાં શુદ્ધનિર્મલજ્યોતિષીમ્મ્ ।
સર્વતત્ત્વમયીં વન્દે ગાયત્રીં વેદમાતરમ્ ॥ ૧૩॥

અથ ધ્યાનમ્ ।
મુક્તા વિદ્રુમહેમનીલધવલચ્છાયૈર્મુખૈસ્ત્રીક્ષણૈ-
    ર્યુક્તામિન્દુનિબદ્ધરત્નમુકુટાં તત્ત્વાર્થવર્ણાત્મિકામ્ ।
ગાયત્રીં વરદાભયાઙ્કુશકશાં શૂલં કપાલં ગુણં
    શઙ્ખં ચક્રમથારવિન્દયુગલં હસ્તૈર્વહન્તીં ભજે ॥ ૧૪॥

ૐ ગાયત્રી પૂર્વતઃ પાતુ સાવિત્રી પાતુ દક્ષિણે ।
બ્રહ્મવિદ્યા ચ મે પશ્ચાદુત્તરે માં સરસ્વતી ॥ ૧૫॥

પાવકી મે દિશં રક્ષેત્પાવકોજ્જ્વલશાલિની ।
યાતુધાનીં દિશં રક્ષેદ્યાતુધાનગણાર્દિની ॥ ૧૬॥

પાવમાનીં દિશં રક્ષેત્પવમાનવિલાસિની ।
દિશં રૌદ્રીમવતુ મે રુદ્રાણી રુદ્રરૂપિણી ॥ ૧૭॥

ઊર્ધ્વં બ્રહ્માણી મે રક્ષેદધસ્તાદ્વૈષ્ણવી તથા ।

એવં દશ દિશો રક્ષેત્ સર્વતો ભુવનેશ્વરી ॥ ૧૮॥

બ્રહ્માસ્ત્રસ્મરણાદેવ વાચાં સિદ્ધિઃ પ્રજાયતે ।
બ્રહ્મદણ્ડશ્ચ મે પાતુ સર્વશસ્ત્રાસ્ત્રભક્ષકઃ ॥ ૧૯॥

બ્રહ્મશીર્ષસ્તથા પાતુ શત્રૂણાં વધકારકઃ ।
સપ્ત વ્યાહૃતયઃ પાન્તુ સર્વદા બિન્દુસંયુતાઃ ॥ ૨૦॥

વેદમાતા ચ માં પાતુ સરહસ્યા સદૈવતા ।
દેવીસૂક્તં સદા પાતુ સહસ્રાક્ષરદેવતા ॥ ૨૧॥

ચતુઃષષ્ટિકલા વિદ્યા દિવ્યાદ્યા પાતુ દેવતા ।
બીજશક્તિશ્ચ મે પાતુ પાતુ વિક્રમદેવતા ॥ ૨૨॥

તત્પદં પાતુ મે પાદૌ જઙ્ઘે મે સવિતુઃપદમ્ ।
વરેણ્યં કટિદેશં તુ નાભિં ભર્ગસ્તથૈવ ચ ॥ ૫૩॥

દેવસ્ય મે તુ હૃદયં ધીમહીતિ ગલં તથા ।
ધિયો મે પાતુ જિહ્વાયાં યઃપદં પાતુ લોચને ॥ ૨૪॥

લલાટે નઃ પદં પાતુ મૂર્ધાનં મે પ્રચોદયાત્ ।
તદ્વર્ણઃ પાતુ મૂર્ધાનં સકારઃ પાતુ ભાલકમ્ ॥ ૨૫॥

ચક્ષુષી મે વિકારસ્તુ શ્રોત્રં રક્ષેત્તુ કારકઃ ।
નાસાપુટેર્વકારો મે રેકારસ્તુ કપોલયોઃ ॥ ૨૬॥

ણિકારસ્ત્વધરોષ્ઠે ચ યકારસ્તૂર્ધ્વ ઓષ્ઠકે ।
આત્યમધ્યે ભકારસ્તુ ગોકારસ્તુ કપોલયોઃ ॥ ૨૭॥

દેકારઃ કણ્ઠદેશે ચ વકારઃ સ્કન્ધદેશયોઃ ।
સ્યકારો દક્ષિણં હસ્તં ધીકારો વામહસ્તકમ્ ॥ ૨૮॥

મકારો હૃદયં રક્ષેદ્ધિકારો જઠરં તથા ।
ધિકારો નાભિદેશં તુ યોકારસ્તુ કટિદ્વયમ્ ॥ ૨૯॥

ગુહ્યં રક્ષતુ યોકાર ઊરૂ મે નઃ પદાક્ષરમ્ ।
પ્રકારો જાનુની રક્ષેચ્ચોકારો જઙ્ઘદેશયોઃ ॥ ૩૦॥

દકારો ગુલ્ફદેશં તુ યાત્કારઃ પાદયુગ્મકમ્ ।
જાતવેદેતિ ગાયત્રી ત્ર્યમ્બકેતિ દશાક્ષરા ॥ ૩૧॥

સર્વતઃ સર્વદા પાતુ આપોજ્યોતીતિ ષોડશી ।
ઇદં તુ કવચં દિવ્યં બાધાશતવિનાશકમ્ ॥ ૩૨॥

ચતુઃષષ્ઠિકલાવિદ્યાસકલૈશ્વર્યસિદ્ધિદમ્ ।
જપારમ્ભે ચ હૃદયં જપાન્તે કવચં પઠેત્ ॥ ૩૩॥

સ્ત્રીગોબ્રાહ્મણમિત્રાદિદ્રોહાદ્યખિલપાતકૈઃ ।
મુચ્યતે સર્વપાપેભ્યઃ પરં બ્રહ્માધિગચ્છતિ ॥ ૩૪॥

પુષ્પાઞ્જલિં ચ ગાયત્ર્યા મૂલેનૈવ પઠેત્સકૃત્ ।
શતસાહસ્રવર્ષાણાં પૂજાયાઃ ફલમાપ્નુયાત્ ॥ ૩૫॥

ભૂર્જપત્રે લિખિત્વૈતત્ સ્વકણ્ઠે ધારયેદ્યદિ ।
શિખાયાં દક્ષિણે બાહૌ કણ્ઠે વા ધારયેદ્બુધઃ ॥ ૩૬॥

ત્રૈલોક્યં ક્ષોભયેત્સર્વં ત્રૈલોક્યં દહતિ ક્ષણાત્ ।
પુત્રવાન્ ધનવાન્ શ્રીમાન્નાનાવિદ્યાનિધિર્ભવેત્ ॥ ૩૭॥

બ્રહ્માસ્ત્રાદીનિ સર્વાણિ તદઙ્ગસ્પર્શનાત્તતઃ ।
ભવન્તિ તસ્ય તુચ્છનિ કિમન્યત્કથયામિ તે ॥ ૩૮॥

અભિમન્ત્રિતગાયત્રીકવચં માનસં પઠેત્ ।
તજ્જલં પિબતો નિત્યં પુરશ્ચર્યાફલં ભવેત્ ॥ ૩૯॥

લઘુસામાન્યકં મન્ત્રં, મહામન્ત્રં તથૈવ ચ ।
યો વેત્તિ ધારણાં યુઞ્જન્, જીવન્મુક્તઃ સ ઉચ્યતે ॥ ૪૦॥

સપ્તવ્યાહૃતિવિપ્રેન્દ્ર સપ્તાવસ્થાઃ પ્રકીર્તિતાઃ ।
સપ્તજીવશતા નિત્યં વ્યાહૃતી અગ્નિરૂપિણી ॥ ૪૧॥

પ્રણવે નિત્યયુક્તસ્ય વ્યાહૃતીષુ ચ સપ્તસુ ।
સર્વેષામેવ પાપાનાં સઙ્કરે સમુપસ્થિતે ॥ ૪૨॥

શતં સહસ્રમભ્યર્ચ્ય ગાયત્રી પાવનં મહત્ ।
દશશતમષ્ટોત્તરશતં ગાયત્રી પાવનં મહત્ ॥ ૪૩॥

ભક્તિયુક્તો ભવેદ્વિપ્રઃ સન્ધ્યાકર્મ સમાચરેત્ ।
કાલે કાલે પ્રકર્તવ્યં સિદ્ધિર્ભવતિ નાન્યથા ॥ ૪૪॥

પ્રણવં પૂર્વમુદ્ધૃત્ય ભૂર્ભુવસ્વસ્તથૈવ ચ ।
તુર્યં સહૈવ ગાયત્રીજપ એવમુદાહૃતમ્ ॥ ૪૫॥

તુરીયપાદમુત્સૃજ્ય ગાયત્રીં ચ જપેદ્દ્વિજઃ ।
સ મૂઢો નરકં યાતિ કાલસૂત્રમધોગતિઃ ॥ ૪૬॥

મન્ત્રાદૌ જનનં પ્રોક્તં મત્રાન્તે મૃતસૂત્રકમ્ ।
ઉભયોર્દોષનિર્મુક્તં ગાયત્રી સફલા ભવેત્ ॥ ૪૭॥

મત્રાદૌ પાશબીજં ચ મન્ત્રાન્તે કુશબીજકમ્ ।
મન્ત્રમધ્યે તુ યા માયા ગાયત્રી સફલા ભવેત્ ॥ ૪૮॥

વાચિકસ્ત્વહમેવ સ્યાદુપાંશુ શતમુચ્યતે ।
સહસ્રં માનસં પ્રોક્તં ત્રિવિધં જપલક્ષણમ્ ॥ ૪૯॥

અક્ષમાલાં ચ મુદ્રાં ચ ગુરોરપિ ન દર્શયેત્ ।
જપં ચાક્ષસ્વરૂપેણાનામિકામધ્યપર્વણિ ॥ ૫૦॥

અનામા મધ્યયા હીના કનિષ્ઠાદિક્રમેણ તુ ।
તર્જનીમૂલપર્યન્તં ગાયત્રીજપલક્ષણમ્ ॥ ૫૧॥

પર્વભિસ્તુ જપેદેવમન્યત્ર નિયમઃ સ્મૃતઃ ।
ગાયત્રી વેદમૂલત્વાદ્વેદઃ પર્વસુ ગીયતે ॥ ૫૨॥

દશભિર્જન્મજનિતં શતેનૈવ પુરા કૃતમ્ ।
ત્રિયુગં તુ સહસ્રાણિ ગાયત્રી હન્તિ કિલ્બિષમ્ ॥ ૫૩॥

પ્રાતઃકાલેષુ કર્તવ્યં સિદ્ધિં વિપ્રો ય ઇચ્છતિ ।
નાદાલયે સમાધિશ્ચ સન્ધ્યાયાં સમુપાસતે ॥ ૫૪॥

અઙ્ગુલ્યગ્રેણ યજ્જપ્તં યજ્જપ્તં મેરુલઙ્ઘને ।
અસઙ્ખ્યયા ચ યજ્જપ્તં તજ્જપ્તં નિષ્ફલં ભવેત્ ॥ ૫૫॥

વિના વસ્ત્રં પ્રકુર્વીત ગાયત્રી નિષ્ફલા ભવેત્ ।
વસ્ત્રપુચ્છં ન જાનાતિ વૃથા તસ્ય પરિશ્રમઃ ॥ ૫૬॥

ગાયત્રીં તુ પરિત્યજ્ય અન્યમન્ત્રમુપાસતે ।
સિદ્ધાન્નં ચ પરિત્યજ્ય ભિક્ષામટતિ દુર્મતિઃ ॥ ૫૭॥

ઋષિશ્છન્દો દેવતાખ્યા બીજં શક્તિશ્ચ કીલકમ્ ।
નિયોગં ન ચ જાનાતિ ગાયત્રી નિષ્ફલા ભવેત્ ॥ ૫૮॥

વર્ણમુદ્રાધ્યાનપદમાવાહનવિસર્જનમ્ ।

દીપં ચક્રં ન જાનાતિ ગાયત્રી નિષફલા ભવેત્ ॥ ૫૯ ॥

શક્તિન્યાસસ્તથા સ્થાનં મન્ત્રસમ્બોધનં પરમ્ ।
ત્રિવિધં યો ન જાનાતિ ગાયત્રી તસ્ય નિષ્ફલા ॥ ૬૦ ॥

પઞ્ચોપચારકાંશ્ચૈવ હોમદ્રવ્યં તથૈવ ચ ।
પઞ્ચાઙ્ગં ચ વિના નિત્યં ગાયત્રી નિષ્ફલા ભવેત્ ॥ ૬૧ ॥

મન્ત્રસિદ્ધિર્ભવેજ્જાતુ વિશ્વામિત્રેણ ભાષિમ્ ।
વ્યાસો વાચસ્પતિર્જીવસ્તુતા દેવી તપઃસ્મૃતૌ ॥ ૬૨ ॥

સહસ્રજપ્તા સા દેવી હ્યુપપાતકનાશિની ।
લક્ષજાપ્યે તથા તચ્ચ મહાપાતકનાશિની ।
કોટિજાપ્યેન રાજેન્દ્ર યદિચ્છતિ તદાપ્નુયાત્ ॥ ૬૩ ॥

ન દેયં પરશિષ્યેભ્યો હ્યભક્તેભ્યો વિશેષતઃ ।
શિષ્યેભ્યો ભક્તિયુક્તેભ્યો હ્યન્યથા મૃત્યુમાપ્નુયાત્ ॥ ૬૪ ॥

ઇતિ શ્રીમદ્વસિષ્ઠસંહિતોક્તં ગાયત્રીકવચં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com
and PSA Easwaran

---

*Shri Gayatri Kavacham 1*

pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*